## ।। अथ पंचाशत्तमोऽध्याय: ।। Chapter-55

वसिष्ठ उवाच - ततो गच्छेन्नृपश्रेष्ठ नन्दिनीं लोकमातरम् ।।
नन्दा यत्र तु सुमुखीं देवीमास्थापयत्किल ।। १

नन्दो नाम गणो योऽभूद्गन्धर्वो नृपपुङ्गवः ।।
तेन सर्वं समाख्यातं नन्दां प्राप्य शिवावने ।। २

नन्द उवाच :- त्वया विरहितः साधुर्देवदारुवनात्कृतः ।।
श्रीमालभागमं दीनस्तपस्तप्तुमतन्द्रितः ।। ३

स्थलमेकं समासाद्य वरं श्रीवृक्षशोभितम् ।।
प्रसन्नोऽभून्महादेवस्तत्राराधयतो मम ।। ४

सायुज्यं तव तेनेह मम दत्तं नितम्बिनि ।।
[2]एकं मन्वन्तरं यावन्दणात्वं च सुदुर्लभम् ।। ५

न श्रीमालसमं क्षेत्रं विद्यते शीघ्रसिद्धिदम् ।।
यस्य स्थाने भवेत्सो वै तस्य सिध्य सिध्यति तत्क्षणात् ।। ६

तस्य देवस्य देवत्वं वृथा मन्ये सुलोचने ।।
श्रीमाले यस्य नांशोऽस्ति सर्वर्षिसुरसेविते ।। ७

-०-

१ बी नन्दा यत्र सखी देव्या

२ बी एवं

सार्धकोटि[1]श्च तीर्थानां मध्यश्च विमलोदका: ।।
न संख्या देवखातानां यत्र जाने शिवासखि ।। ८

नन्दोवाच :- मम दर्शय तत्क्षेत्रं श्रीमालं श्रीविनिर्मितम् ।।
त्वं मम प्रेयसी नन्द यदि सत्यमिदं वच: ।। ९

नन्द उवाच :- क्षिप्रं प्रयाहि लोलाक्षि श्रीमालं प्रति संप्रति ।।
दर्शयामि यथासर्वं महिमानं दिवौकसाम् ।। १०

वसिष्ठ उवाच :- ततस्तौ प्रस्थितौ राजन् कैलाशात्खेचरौ द्रुतम् ।।
श्रीमालं क्षेत्रमायातौ वेदध्वनिविनोदितम्[2] ।। ११

तत: सर्वाणि तीर्थानि विगाह्य क्रमशो नृप ।।
दुर्धरस्थलमासाद्य नन्दा तस्थौ निशा दश: ।। १२

दुर्धरेश्वरमभ्यर्च्य पश्यन्तौ तीर्थयात्रिकान् ।।
तावुभौ हर्षसंपन्नौ शिवयोरनुचारिणौ ।। १३

ततो नन्दा शिवां देवीमाराधयितुमुत्सुका ।।
प्रदेशं शुचिमासाद्य मूर्तिमास्थाय यच्छुभाम् ।। १४

-0-

१ बी सार्ग्रा
२ बी (नि) दातिम्

१ ए सार्धाकोटीश्च

दिव्यैर्गन्धैस्तथा पुष्पैर्बलिभिर्विविधैरपि ।।
पूजिता सह नन्देन नन्दया शर्करप्रिया ।। १५

प्रख्याताभून्महीपाल ज्ञात्वा नन्दां महीतले ।।
अभ्यर्च्यमानामात्मानं मूर्ता देवीदमब्रवीत् ।। १६

देव्युवाच :- वरं वरय कल्याणि नन्दे यत्ते हृदि स्थितम् ।।
दास्यामि तं न सन्देहस्तव तुष्टास्मि खेचरि ।। १७

नन्दोवाच :- स्थातव्यमिह सर्वेशि श्रीमाले सततं त्वया ।।
येन सर्वेषु लोकेषु कीर्तिः स्यान्मम शाश्वती ।। १८

गीयते[1] यस्य तीर्थेषु यावत्कीर्तिरनुत्तमा ।।
तावत्तीर्थावगाहस्य स पुमान्पुण्यमश्नुते ।। १९

देव्युवाच :- स्थितिमत्र करिष्यामि तव नन्दे हिताय वै ।।
नन्दिनीति भुवि ख्याता भक्तानां भयहारिणी ।। २०

-०-

१ बी गीयते तस्य

ये ऽर्चयिष्यन्ति मामत्र भक्त्या परमया शुभे ।।
न तेषां रिपुसंभूतं भयं जातु भविष्यति ।। २१

वसिष्ठ उवाच :- इत्युक्त्वा सा तदा देवी नन्दिनी मनुजेश्वर ।।
कैलाशशिखरं प्राप्ता सह ताभ्यां मनोजवा ।। २२

एवं सा नन्दिनी राजन् श्रीमालेभून्महेश्वरी ।।
वरदा पुत्रदा नित्यं भक्तेभ्यो नात्र संशयः ।। २३

श्रुतं माहात्म्यमेतद्वै नन्दिन्या: कुर्वते करो १ नृणाम् ।।
कीर्तिमारोग्यमैश्वर्यं भयनाशं च भूपते ।। २४

इतिश्री स्कन्दपुराणे श्रीमालमाहात्म्ये नन्दिन्युपाख्यानं नाम पंचपंचाशत्तमोऽध्याय: ।। ५५ ।।

१ ए नन्दिकाकरोन्नृणाम ।